6th Semester BA (CBCSS)

Core Course in Sanskrit Special Vedanta

CODE X ब्रह्मसूत्रम्- शाङ्करभाष्यम् -चतुस्सूत्री

**I. पदेनैकेन उत्तरं लिखत। 1-16**

1. शारीरकमीमांसाभाष्यकर्ता कः?
2. अस्मत्प्रत्यगोचरः कः?
3. शुक्तिका कथमवभासते?
4. अध्यासकृतेन दोषेण गुणेन वा कः न संबध्यते?
5. स्वाध्यायानन्तर्यं कयोः समानम्?
6. निश्रेयसफलं किं भवति?
7. ज्ञानेन प्रमाणेन आप्तुमिष्टतमं किम्?
8. जिज्ञास्यब्रह्मणः लक्षणं किम्?
9. जन्मादिसूत्रे समासार्थः कः ?
10. जन्मादिसूत्रे यतः इति किं निर्दिश्यते?
11. भूतवस्तुविषयाणां प्रामाण्यं कथमस्ति?
12. तत्तु समन्वयात् इति सूत्रे तुशब्दस्य किं प्रयोजनम्?
13. उत्तरेण पथा गमनं केषामेव भवति?
14. सशरीरत्वस्य निमित्तं किम्?
15. देहादौ अहं प्रत्ययः किं नास्ति?
16. लौकिकप्रमाणानां प्रामाण्यं कियत् पर्यन्तं भवति ?

**II. वाक्येन वाक्याभ्यां वा पञ्चानामुत्तरं लिखत – 18-24**

17. अध्यासः कस्मात् मिथ्येति भवितुं युक्तम्?
18. अनिर्वचनीयख्यातिलक्षणं किम्?
19. प्रत्यगात्मनः अविषयत्वं विचारयत।
20. वेदान्तवेद्यमात्मतत्त्वं कीदृशमस्ति?
21. कीदृशः अथसब्दः मङ्गलप्रयोजनः भवति?
22. वेदः कथमग्निहोत्रादीनां श्रेयःसाधनानामनित्फलतां दर्शयति?
23. ब्रह्मणः इत्यत्र कर्मणि षष्ठि कुतः स्वीक्रियते?

24. अपवर्गविषयकं न्यायसूत्रं प्रदशयत।

**III. चतुर्णामुत्तरं लघूपन्यासरूपेण लिखत – (25-30)**

25. प्रमाणानां शास्त्राणं चाविद्यावद्विषयत्वं कथमिति उपपादयत।
26. धर्मब्रह्मजिज्ञासयोः फलजिज्ञास्यभेदे दृष्टान्तानुपपादयत।
27. शास्त्रस्य योनिः शास्त्रयोनि इति विग्रहानुसारं शास्त्रयोनित्वात् इति सूत्रस्य अर्थं प्रदर्शयत।
28. तस्मात्प्रतिपत्तिविधिविषयकतयैव शास्त्रप्रमाणकं ब्रह्म अभ्युपगन्तव्यम् – उपपादयत।
29. ब्रह्मविज्ञानस्य सम्पदादिरूपत्वं निराकुरुत।
30. ज्ञानस्य मानसिकक्रियात्वमुपपादयत

**IV. द्वौ उपन्यसत। (31-33)**

31. अध्यासस्वरूपं विशदयत।
32. अथातो ब्रह्मजिज्ञासेति सूत्रं व्याख्यात।
33. जन्मादिसूत्रं यथाभाष्यं व्याख्यात।

## Answers and Answer keys

I. ..

1. शङ्कराचार्यः।
2. विषयी
3. रजतवत्।
4. आत्मा।
5. धर्मब्रह्मजिज्ञासयोः।
6. ब्रह्मज्ञानम्।
7. ब्रह्म।
8. जन्माद्यस्य यतः।
9. जन्मस्थितिभङ्गम्।
10. कारणनिर्देशः।
11. वस्तुतन्त्रम्।
12. पूर्वपक्षव्यवृत्तिः।
13. यागाद्यनुष्ठायिनाम्।
14. मिथ्यज्ञानम्।

15. गौणः।

16. आत्मनिश्चयपर्यन्तम्।

II. ...

17. परस्परविरुद्धस्वभावयोः विषयविषयिणोः तद्धर्माणां च इतरेतरभावानुपपत्तौ सिद्धायां तयोः इतरेतराध्यासः मिथ्येति भवितुं युक्तम्।

18. स्मृतिरूपः परत्र पूर्वदृष्टावभासः।

19. प्रत्यगात्मा अस्मत्प्रत्ययविषयः इत्यतः तस्य अत्यन्तमविषयत्वं नास्ति।

20. अशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदम् असंसारि च भवति वेदान्तवेद्यम् आत्मतत्त्वम्।

21. अर्थान्तरेषु आनन्तर्यादिषु प्रयुक्तः अथशब्दः श्रुत्या – श्रवणमात्रेण मङ्गलप्रयोजनः भवति।

22. तद्यथेह कर्मचितो लोकः क्षीयते एवमेवाममुत्र पुण्यचितो लोकः क्षीयते इति छान्दोग्योपनिषत् अग्निहोत्रादीनां श्रेयस्शधनानामनित्यफलतां दर्शयति।

23. जिज्ञास्यापेक्षत्वात् जिज्ञासायाः जिज्ञास्यान्तारानिर्देशाच्च ब्रह्मण इत्यत्र कर्मणि षष्ठि स्वीक्रियते, न शेषे।

24. दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायेन तदनन्तरापायादपवर्गः।

III. ...

25. देहेन्द्रियादिषु अहं ममाभिमानरहितस्य प्रमातृत्वनुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तिः। इन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः न संभवति। अधिष्ठानमन्तरेण इन्द्रियाणां व्यवहारः संभवति। अनध्यस्तात्मभावेन देहेन कश्चित् न व्याप्रियते। एतस्मिन् सर्वस्मिन् अपि असति असङ्गस्य आत्मनः प्रमातृत्वं न उपपद्यते। प्रमातृत्वं विना प्रमाणप्रमणप्रवृत्तिः अपि नास्ति। अतः प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च अविद्यावद्विषयाण्येव।

26. अथशब्दार्थविचारः प्रसङ्गः। आनन्तर्यार्थः इति निर्णीतः. कस्यानन्तर्यमिति सन्देहः। कर्मावबोधानन्तर्यमिति पूर्वपक्षः। तत्रेदं समाधानम् – धर्मजिज्ञासायाः प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तिः। तत्प्रसङ्गे उभयोः भेदविचारे प्रवृत्ते उभयोः फलजिज्ञास्यभेदं प्रदर्श्यते। फलभेदः – धर्मज्ञानम् अभ्युदयफलम्, ब्रह्मज्ञानं निःश्रेयसफलम्। प्रथममनुष्ठानमपेक्षते पुरुषव्यापारतन्त्रं च, द्वितीयं तु न, नापि पुरुषव्यपारतन्त्रम्। । जिज्ञास्यभेदः यथा – प्रथमः भव्यः, द्वितीयं तु भूतम्।

27. शास्त्रयोनित्वात् इति सूत्रस्य अर्थद्वयं विग्रहद्वयापेक्षया। तत्रेदं प्रथमं – शास्त्रस्य योनिः शास्त्रयोनि इथि। शास्त्रं च महत् ऋग्वेदादिकम्। तस्य सर्वज्ञकल्पस्य योनित्वात् शास्त्रयोनेः ब्रह्मणः सर्वज्ञत्वं सिद्ध्यति।

28. यूपाहनीयादियज्ञद्रव्यवत् प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते इति पूर्वमीमांसकमतम्। यतः शास्त्रं प्रवृत्तिनिवृत्तिप्रयोजकम्। यज्ञादिषु प्रवर्तकत्ववत् विरक्तस्य निवृत्तिविधिपरं वेदान्तम्। केवलवस्तुप्रतिपादनेन प्रयोजनाभावात् कार्यविधिप्रयुक्ततयैव आत्मा वा अरे द्रष्टव्यः इत्यादीनि वाक्यानि योजनीयीनि।

29. ब्रह्मविज्ञानस्य सम्पदादिरूपत्वे अभ्युपगम्यमाने तत्त्वमसि इत्यादीनि ब्रह्मात्मैकत्वप्रतिपादनपराणि वाक्यानि न युञ्जीरन्।

30. ज्ञानं मानसमपि न तत्क्रिया। क्रिया वस्तुस्वरूपमनपेक्ष्यैव सर्वदा प्रवर्तते। ध्यानं मानसमपि पुरुषव्यापाराधीनं नास्ति।

IV. …

31. अध्यासस्य नैसर्गिकता। तल्लक्षणानि भिन्नमतानुसारम्। व्यहाराणां लौकिकानां वैदिकानाञ्च, शास्त्रीयाणां च अविद्याश्रयत्वम्। विद्वविदोः लौकिकव्यवहारे भेदाभावः। शास्त्रीयव्यवहाराणाम् अविद्यश्रयत्वम्। भिन्नाध्यासानां दृष्टान्ताश्च। एवं शास्त्रारम्भकत्वं समर्थितम्।

32. अथशब्दस्य आनन्तर्यार्थः। साधनचतुष्टयसम्पत्त्यनन्तरमिति अर्थः। ऐहिककर्माणाम् अनित्यफलवत् आमुष्मिकफलानां कर्मणामपि अनित्यत्वात् अनन्तफलाय मोक्षाय ब्रह्नजिज्ञासा कार्येति सूत्रार्थः। अनन्तरं ब्रह्मजिज्ञसाश्दार्थविचारे कर्मणि षष्ठिविचारः, ब्रह्मशब्दस्य प्रसिद्धत्वे अपि जिज्ञसायाः समुचितता इति सूत्रार्थः।

33. जन्मदिशब्दस्य समासार्थमुक्त्वा, अस्येति पदं यतः इति पदञ्च व्याख्याय यास्कोक्तेभ्यः जायते अस्ति इत्यादिभ्यः सूत्रार्थस्य वैलक्षऑण्यम्, अनुमानाद्भेदः, भूतवस्तुनोऽपि जि5स्यता तथा अन्ते तैत्तिरीयगतवाक्यविचारश्च कार्यः.।